# .. pRithivIgItA ..

# ॥ પૃથિવીગીતા ॥

## Document Information

Text title : pRithivIgItA

File name : pRithivIgItA.itx

Category : gItA

Location : doc_giitaa

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : May 18, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પૃથિવીગીતા ॥

મૈત્રેય પૃથિવીગીતા શ્લોકાશ્ચાત્ર નિબોધ તાન્ ।
યાનાહ ધર્મધ્વજિને જનકાયાસિતો મુનિઃ ॥ ૧॥

પૃથિવ્યુવાચ –
કથમેષ નરેન્દ્રાણાં મોહો બુદ્ધિમતામપિ ।
યેન કેન સધર્માણોઽપ્યભિવિશ્વસ્તચેતસઃ ॥ ૨॥

પૂર્વમાત્મજયં કૃત્વા જેતુમિચ્છન્તિ મન્ત્રિણઃ ।
તતો ભૃત્યાંશ્ચ પૌરાંશ્ચ જિગીષન્તે તથા રિપૂન્ ॥ ૩ ॥

ક્રમેણાનેન જેષ્યામો વયં પૃથ્વીં સસાગરામ્ ।
ઇત્યાસક્તધિયો મૃત્યું ન પશ્યન્ત્યવિદૂરકમ્ ॥ ૪॥

સમુદ્રાવરણં યાતિ મન્મણ્ડલમથો વશમ્ ।
કિયદાત્મજયાદેતન્મુક્તિરાત્મજયે ફલમ્ ॥ ૫॥

ઉત્સૃજ્ય પૂર્વજા યાતા યાં નાદાય ગતઃ પિતા ।
તાં મમેતિ વિમૂઢત્વાત્ જેતુમિચ્છન્તિ પાર્થિવાઃ ॥ ૬॥

મત્કૃતે પિતૃપુત્રાણાં ભ્રાતૄણાં ચાપિ વિગ્રહાઃ ।
જાયન્તેઽત્યન્તમોહેન મમતાધૃતચેતસામ્ ॥ ૭॥

પૃથ્વી મમેયં સકલા મમૈષા મમાન્વયસ્યાપિ ચ શાશ્વતેયમ્ ।
યો યો મૃતો હ્યત્ર બભૂવ રાજા કુબુદ્ધિરાસીદિતિ તસ્ય તસ્ય ॥ ૮॥

દૃષ્ટ્વા મમત્વાયતચિત્તમેકં વિહાય માં મૃત્યુપથં વ્રજન્તમ્ ।
તસ્યાન્વયસ્તસ્ય કથં મમત્વં હૃદ્યાસ્પદં મત્પ્રભવઃ કરોતિ ॥ ૯॥

પૃથ્વી મમૈષાશુ પરિત્યજૈનં વદન્તિ યે દૂતમુખૈઃ સ્વશત્રુમ્ ।
નરાધિપાસ્તેષુ મમાતિહાસઃ પુનશ્ચ મૂઢેષુ દયાભ્યુપૈતિ ॥ ૧૦॥

પરાશર ઉવાચ
ઇત્યેતે ધરણીગીતાશ્લોકા મૈત્રેય યૈઃ શ્રુતૈઃ ।
મમત્વં વિલયં યાતિ તાપન્યસ્તં યથા હિમમ્ ॥ ૧૧॥

ઇતિ પૃથિવીગીતા સમાપ્તા ।

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

.. pRithivIgItA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*